# $\frac{209}{TS}$ (New Syllabus)

C

**Total No. of Questions – 16**
**Total No. of Printed Pages – 4**

**Regd. No.**

## Part – II
## SANSKRIT, Paper - II
**(Second Language)**

**Time : 3 Hours]** **[Max. Marks : 100**

**Note :** (1) **All** questions should be attempted.

(2) Question Nos. **1, 2 & 3** should be answered either in the medium of instruction of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

**निर्देश :** प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।
सर्वे प्रश्नाः संस्कृते एव समाधेयाः ।

I. **एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत । **1 × 8 = 8**

(अ) न गीतवाद्याभिरतिर्विलसव्यसनी भवेत् ।
वीणा विनोदव्यसनी वत्सेशः शत्रुणा हृतः ।।

(आ) धीरो भव सदाचित्रे निर्भयोस्मीति भावय ।
भयं मृत्युर्भयंपापं नरको भयमेव हि ।।

II. **एकं** निबन्धप्रश्नं समाधत्त । **1 × 6 = 6**

(अ) गङ्गा भगीरथस्य पितृदेवतानां पापं कथं धौतवती ?

(आ) "काव्यं पुष्पविलापनाम हृदि मे स्फूर्तम्" विवृणुत ।

III. **एकं** निबन्धप्रश्नं समाधत्त । **1 × 6 = 6**

(अ) अगस्त्यपण्डितः गोविन्दपट्टाभिषेकं कथं वर्णितवान् ?

(आ) दधीचिः दानवीरः कथम् अभवत् ?

IV. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

(आ) राज्यं नाम कीदृशम् ?

(इ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(ई) किमर्थम् गरुडेन देवलोकात् अमृतवृष्टिः पातिता ?

(उ) पार्वती तपः कथम् आचरति ?

(ऊ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते ?

V. द्वयोः ससन्दर्भं व्याख्यानम् लिखत । $2 \times 3 = 6$

(अ) सगटस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ।

(आ) भविता ते न कदापि सत्त्वसादः ।

(इ) गृहकृत्याय निवृत्यतां लघु ।

(ई) जातस्त्वं भुवि गौतमस्य ।

VI. द्वयोः ससन्दर्भं व्याख्यानं लिखत । $2 \times 3 = 6$

(अ) यदि कौतूहलं आकर्ण्यताम् ।

(आ) भो भोः ! मा भैष्ट भद्राः ।

(इ) पूर्णाः ननु मम सकलाः अपि कामनाः ।

(ई) कमपि प्रतिकारं कुरुष्व ।

VII. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) हरः गङ्गां किं प्रति विससर्ज ?

(आ) पाण्ड्यराजः खड्गं कथं प्राप्तवान् ?

(इ) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

(ई) केन सर्वरोगस्य सम्भवः भवति ?

(उ) नृपः किमिति निश्चयमागतः ।

(ऊ) विश्वसृट् कुतः पूजां न स्वीकुर्यात् ?

VIII. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) बाणभट्टेन विरचितं काव्यद्वयं किम् ?

(आ) मेघानां गणस्य नाम किम् ?

(इ) सहस्रलोचनः वीरं किमवदत् ?

(ई) नरेन्द्रः श्रीरामकृष्णं किमिति अपृच्छत् ?

(उ) कदा चूडाला जटाश्मश्रुवेषं विमुच्य राजः सम्मुखं अतिष्ठत् ?

(ऊ) त्रिशिराः त्रिभिः शिरोभिः किं किम् अकरोत् ?

IX. **एकेन** वाक्येन समाधानं दत्त ।  $5 \times 1 = 5$

(अ) का जह्नुसुता इति प्रोच्यते ?

(आ) मधुराराज: कीदृश: ?

(इ) कतिभि: दिनै: चाणक्य: नन्दान् अपातयत् ?

(ई) सत्यविजय: इत्ययं पाठ्यभाग: केन विरचित: ?

(उ) किं पाषाणमयम् अभूत् ?

X. **एकेन** वाक्येन समाधानं दत्त ।  $5 \times 1 = 5$

(अ) शुकस्य नाम किम् ?

(आ) कृष्णाय गोविन्द इति बिरुदं केन दत्तम् ?

(इ) सिद्धपुरुष: क: ?

(ई) उज्जयिन्या: राजा क: ?

(उ) वृत्रासुर: कस्य भक्त: ?

XI. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त ।  $5 \times 1 = 5$

उज्जयिन्यां भट्टि: नाम कोऽपि ब्राह्मण: आसीत् । तस्य अभयाम्बा नाम भार्या, कमलाकरो नाम तनय: च आस्ताम् । एकपुत्रौ तौ दम्पती कमलाकरे नितान्तं प्रेमवन्तौ बभूवतु: । स: तु शरीरम् अलङ्कृत्य विद्यापराङ्मुख: विषयोन्मुख: च अभवत् । तथाविधं तम् आहूय भट्टि: कदाचिदेवम् उपदिदेश –

"मानवकुले जन्म महता पुण्येन लभ्यते । तत् लब्ध्वा अपि त्वमेवं दुर्वृत्त: असि । किञ्च तवायं विद्याभ्यासस्य काल: । इदानीं यदि विद्यां नाभ्यस्यसि तर्हि पश्चात्तव महासन्ताप: भविष्यति । अपरं च यावत् अहं जीवामि तावत्त्वया विद्या अभ्यसनीया । पश्चात्तु सा दुर्लभा भवेत् ।"

**प्रश्ना :**

(अ) उज्जयिन्यां क: आसीत् ?

(आ) भट्टे: भार्याया: नाम किम् ?

(इ) भट्टे: तनयस्य नाम किम् ?

(ई) का पश्चात् दुर्लभा भवति ?

(उ) किं महता पुण्येन लभ्यते ?

XII. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त ।  $3 \times 2 = 6$

(अ) शरत् + चन्द्र:

(आ) तत् + टीका

(इ) षट् + वारम्

(ई) जगत् + नाथ:

(उ) गुरु: + जयति

(ऊ) वृक्ष: + फलति

XIII. नामनिर्देशपूर्वकं **त्रीन्** विघटयत । $3 \times 2 = 6$

(अ) मनश्चलति
(आ) सज्जन:
(इ) हरिष्टीकते
(ई) सुबन्तम्
(उ) वाङ्महिमा
(ऊ) बाल: खादति

XIV. **द्वयो:** शब्दयो: सर्वविभक्तिरूपाणि लिखत । $2 \times 6 = 12$

(अ) मरुत्
(आ) वाच्
(इ) मनस्
(ई) एतद् (नपुं)

XV. समास नामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) प्रतिदिनम्
(आ) ग्रामगत:
(इ) नीलघट:
(ई) पञ्चवटी
(उ) महाबल:
(ऊ) धर्मार्थकाममोक्षा:

XVI. **रेखांकितपदं** शुद्धीकृत्य वाक्यं लिखत । $5 \times 1 = 5$

(अ) युवक: क्रीडाङ्गणे क्रीडन्ति ।
(आ) बालिका: सम्यक् गायति ।
(इ) स: विद्यालये अपठताम् ।
(ई) युवां जलं पास्यथ ।
(उ) वयं विपणिं गमिष्यामि ।